# Thiruvananthapuram Edl Dist

## SSLC EXAMINATION 2020-21

**FIRST LANGUAGE - PART I PAPER- I**

**SANSKRIT (For Academic and Oriental schools)**

**SAMPLE QUESTION PAPER**

**STANDARD : X**

**Maximum Score : 40**
**Time : 1.30 hrs**

**निर्देशाः**

१. २० निमेषाः समाश्वाससमयः। प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः।

२. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि।

३. प्रश्ननानाम् अङ्काः तत्र तत्र दत्ताः। उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः।

४.१ - ३१ प्रश्नेभ्यः परमतः ४० अङ्काः कल्पिताः।

1. 20 മിനിട്ട് സമാശ്വാസസമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യുന്നതിനും ഉപയോഗിക്കാവുന്നതാണ്.
2. ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദേശങ്ങൾ ശ്രദ്ധാപൂർവം വായിച്ചുമനസ്സിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
3. ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.
4. 1 മുതൽ 31 വരെയുള്ള ചോദ്യങ്ങൾക്ക് പരമാവധി ലഭിക്കുക 40 സ്കോർ ആയിരിക്കും.

**1-8 प्रश्नानां प्रत्येकं एकैकः अङ्कः ।**

कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

**1.** दीनवत्सला जननी इति पाठभागः महाभारतस्य कस्मात् पर्वात् उद्धृतः?

( भीष्मपर्वात्, वनपर्वात्, सभापर्वात् )

2.' स्वराज्यं मम जन्माधिकारः' कस्य वचनमिदम् ?

( डा. एस्. राधाकृष्णस्य, बालगङ्गाधरतिलकस्य, महात्मागान्धिनः)

3. वृक्षायुर्वेदस्य कर्ता कः?

( सुरपालः, चरकः, वाग्भटः)

4.सुखदुःखयोः कर्ता कः?

(मनः, वाक्, आत्मा )



TVM EDL DIST

5.' शङ्करदिग्विजयम् ' कस्मिन् काव्यविभागे अन्तर्भवति ?

( स्तोत्रकाव्ये , बालसाहित्ये, महाकाव्ये )

6. दीनं वृषभं दृष्ट्वा का रुरोद ?

(पार्वती , लक्ष्मीः , सुरभिः)

7. लाभानां श्रेष्टं किम् ?

(आरोग्यम् , धनम्, कीर्तिः)

8.' माघम् ' इति प्रसिद्धः महाकाव्यं किम् ?

( किरातार्जुनीयम् , रघुवंशम् ,शिशुपालवधम् )

**9-17 प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।**

9. उदाहरणानुसारम् एकपदं लिखत ।

सुराणाम् अधिपः - सुराधिपः।

नराणाम् अधिप: - ----------- ।

10. उदाहरणानुसारं पदच्छेदं लिखत ।

नोत्थितः - न + उत्थित: ।

नोचितः - ------ + ------- ।

11. सुभाषितं पठित्वा अधोदत्तेभ्यः उचितम् आशयम् चित्वा लिखत ।

**ईर्ष्याभयक्रोधसमन्वितेन**

**लुब्धेन रुग्दैन्यनिपीडितेन ।**

**विद्वेषयुक्तेन च सेव्यमानम्**

**अन्नं न सम्यक् परिपाकमेति ।।**

**क)** ' मानवः शरीरेण यत् कर्म करोति तस्य कर्मणः

फलं स्वशरीरेणैव अनुभूयते' ।

**ख)** ' भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थः भवेत् '।

12. श्लोकं पठित्वा अधोदत्तेभ्यः उचितम् आशयं चित्वा लिखत ।

**भिक्षा त्वया दक्षिणहस्तदत्ता**

**मा ज्ञायतां वामकरेण ते सा ।**

**दानस्य चैवं निभृतं कृतस्य**

**पिता फलं दास्यति गुप्तदर्शी ।।**

**क)** ' दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानातु ' ।

**ख)** ' धर्माचरणम् आत्मनिर्वृत्यर्थम् एव भवेत्

13. श्लोकं पठित्वा गद्यक्रमं लिखत ।

**परिश्रमो मिताहारो**

**भूगतावश्विनीसुतौ**

**तावनादृत्य नैवाहं**

**वैद्यमन्यं समाश्रये ।।**

परिश्रमो --------- भूगातौ --------- तौ अनादृत्य --------

वैद्यं नैव --------- ।

14. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदा- अहं पाठं सुष्टु अपठम् । पूर्णमङ्कं न सम्प्राप्तवान् ।

**यद्यपि** अहं पाठं सुष्टु अपठम् **तथापि** पूर्णमङ्कं न सम्प्राप्तवान् ।

वर्षकालः समागतः। वृष्टिः नास्ति ।(यद्यपि- तथापि )

15. उदाहरणानुसारं वाक्यं परिवर्तयत।

उदा - पिता बालकं ताडयति ।

पिता बालकं **अताडयत्** ।

महिला मन्दिरं गच्छति ।

महिला मन्दिरं --------- ।

16. उदाहरणानुसारं पट्टिकां पूररयत ।

| लङ् | लट् | लोट् |
|---|---|---|
| अताडयत् | ताडयति | ताडयतु । |
| --------- | पृच्छति | --------- । |
| अनयत् | --------- | ---------- |

17. कोष्ठकात् उचितमुत्तरं चित्वा लिखत ।

**अ)** अहं मन्दिरं -------- ?

( गच्छति , गच्छतः, गच्छामि )

**आ)** त्वं पाठं ---------- ?

( पठामः , पठतु , पठसि )

**18-21 प्रश्नानां प्रत्येकं त्रयः अङ्काः।**

18. उदाहरणानुसारं पट्टिकां लिखत ।

| कृतिः | कर्ता | विभागः |
|---|---|---|
| रामायणम् | वाल्मीकिः | इतिहासः । |
| ----------- | सुरपालः | शास्त्रग्रन्थः |
| शङ्करदिग्विजयम् | माधवविद्यारण्यस्वामी | -------- । |
| चरकसंहिता | -------- | आयुर्वेदग्रन्थः। |

19. वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्त, ल्यबन्त पदानि विविच्य लिखत ।

राजप्रशस्तिपरां कृतिमेकं विरच्य समर्पयति चेत् बहु धनं प्रदातुं राजा सज्जः इति दूतःत्यागराजसमीपं गत्वा अवदत् ।

20. कोष्ठकात् उचितानि पदानि स्वीकृत्य पट्टिकां रचयत।

( नुद्यमानः, गच्छन् , लिखन् , पचमानः , हसन् , कम्पमानः, रुदन् , वन्दमानः )

| **शत्रन्तम्** | **शानजन्तम्** |
|---|---|
| गच्छन् | नुद्यमानः |
| ---------- | ------------ |
| --------- | -------- |
| ------- | -------- |

21 समानार्थकपदानि चित्वा लिखत।

(मङ्गलम् , .मनोहरम्, पत्नी )

दारा -

शिवः -

रम्यम् -

**22 - 29 प्रत्येकं चत्वारः अङ्काः ।**

22. यथोचितं योजयत ।

वनस्पतिः - सुरभी

शङ्करदिग्विजयम् - अश्विनीसुतौ

परिश्रमो मिताहारः - माधवविद्यारण्यस्वामी

धेनोः माता - पनसः

23 . उदाहरणानुसारं पट्टिकां पूरयत ।

( ऋक् , शिक्षा, कठम् , निरुक्तम् , सामः, अथर्वः , माण्डूक्यम् )

TVM EDL DIST

वेदा:     वेदाङ्गानि     उपनिषदः।

ऋक्     शिक्षा     कठम्

24 . खण्डिकां पठित्वा संभाषणांशान् पूरयत ।

गुरुकुले वसन्  श्रीशङ्कर :भिक्षार्थं  सतीर्थ्यैः सह एकं ब्राह्मणगृहं प्राप्तवान् । 'अम्ब! भिक्षां देहि ' इति वचनं श्रुत्वा बहिरागता ब्राह्मणपत्नी दीनवचसा -' भिक्षां दातुं किमपि नास्ति| केवलम्आमलकमेव अस्ति' इति अवदत् । 'भवति! यत्किमपि दीयताम्' इति वाक्यमनुसृत्य कुटुम्बिनी शुष्कम् एकम् आमलकम् आनयत् ।' वत्स! इदं स्वीकरोतु' इत्युक्त्वा शङ्कराय अदात्।

शङ्करः- अम्बा! ---------- |

कुटुम्बिनी - अत्र भिक्षां दातुं किमपि नास्ति। केवलम्
आमलकमेव अस्ति।

शङ्करः - भवति!-------- दीयताम् ।

कुटुम्बिनी -   ----------स्वीकरोतु ।

शङ्करः -  ---------- |

25 . सूचनानुसारं शकुन्तलायाः स्वभावं निरुपयत।

सूचना-  शकुन्तला------- अभिज्ञानशाकुन्तलं नाटकं------- नायिका। --- -
--. उत्तमगुणान्विता।-------- परिणयति। दुर्वासशापं-------
विस्मृता।अभिज्ञानदर्शनम्------- पुनः------- समागमः ।

26. सूचना : उपयुज्य ईशोपदेशान् संगृह्य लिखत।



VM EDUIST

सूचना : ---------- क्रिस्तुभागवतम् ------ धर्माचरणं ------ कृपा -----

भिक्षां ददासि ----- कपटभक्ता : ---- रहसि कृतस्य ------- ।

27. श्लोकं पठित्वा अधोदत्त प्रश्नानाम् उत्तराणि लिखत ।

**इति दीनमुदीरयन्त्यसौ**

**प्रददावामलकं व्रतीन्तवे ।**

**करुणं वचनं निशम्य सो**

**अप्यभवज्ज्ञाननिधिर्दयार्द्रधी : ॥**

क ) कुटुम्बिनी व्रतीन्दवे किं प्रददौ ?

ख ) करुणं वचनं निशम्य स : कीदृश : अभवत् ?

ग ) आमलकं कस्मै प्रददौ ?

घ ) श्लोके ल्यबन्तं पदं किम् ?

28) सूचनानुसारं जीवनचरितं लिखत ।

नाम - स्वातितिरुनाल् ।

जन्म - 1813 एप्रिल् 13

पितरौ - राजराजवर्मा वलियकोयित्तम्पुरान् , राणी गौरी लक्ष्मीबाई च ।

प्रशस्ति : - गर्भश्रीमान् ।

कर्ममण्डलम् - प्रजापालनं , संगीतं च ।

कृतय : - रागमालिकास्वरजति :, नवरात्रिकीर्तनानि च ।

TVM EDL DIST

देहवियोग : -   1846 डिसम्बर् 27

29. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

पालक्काट् जिल्लायां लब्धजन्मा ओ. वि. विजयन् महाभाग : न केवलं चित्रकार : अपि तु कथाकार : च भवति । स : 1930 तमे वर्षे जुलै 2 तमे दिने जनिमलभत । स : पद्मभूषण् , साहित्य - अक्कादमी , एषुत्तच्छन् इत्यादिभि : पुरस्कारै : च समादृत : केरलीय : भवति । अस्य 'खसाक्किन्टे इतिहासम् ' इति आख्यायिका अतीव प्रसिद्धा । धर्मपुराणं, प्रवाचकन्टे वषि, मधुरं गायाति इत्यादय : तस्य इतरे ग्रन्था : ।

क) ओ. वि. विजयन् महाभागेन विरचिता आख्यायिका का?

ख) ओ. वि. विजयन् महाभाग : कुत्र जनिमलभत?

ग) खण्डिकात : भूतकालक्रियापदं चित्वा लिखत ।

घ) कै : पुरस्कारै : ओ. वि. विजयन् महाभाग : समादृत :?

## 30 - 31 प्रश्नानां प्रत्येकं पञ्च अङ्का : ।

प्रादेशिकभाषायां परिवर्तयत ।

30) सस्यानि सर्वाणि प्रमुखतया वृक्ष : , वनस्पति : , वीरुत् , ओषधि : इति भेदेन चतुर्धा विभक्तानि । यस्मिन् फलात् पूर्वं पुष्पाणि स्पष्टं दृश्यन्ते स वृक्ष : इति कथ्यते । अव्यक्तपुष्प : य : फलति स एव वनस्पति : । प्रतानै : प्रसारिता वीरुत् । फलपाकान्ता ओषधिश्च । आम्रजम्ब्वादय : वृक्षा :, पनसोदुम्बरादय : वनस्पतय :, कूश्माण्डकर्कट्यादय : वीरुध :, व्रीहिगोधूमादय : ओषध्यश्चेति प्रसिद्धा : ।

TVM EDL DIST

31) श्रीनारायणभट्टपादस्य 'नारायणीयम् ' श्रीमहाभागवतस्य सारभूतं स्तोत्रकाव्यं भवति । वातरोगेण पीडित : अयं कवि : नारायणीय रचनया रोगविमुक्तिं प्राप इति कथा श्रूयते । अस्मिन् काव्ये सहस्राधिका : श्लोका : सन्ति । नारायणीये श्रीकृष्णस्य बाललीला सुललितपदै : भक्तिभावेन च वर्ण्यते । संस्कृतभाषाया : पोषणे मेल्पत्तुर् नारायणभट्टपादस्य योगदानं महदेव।

TVM EDL DIST